

कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः



Acc No. ~~693~~ M-1558
Title - शतकत्रयी.
Author - भर्तृहरि.
Date. - A.D. 1865.
Subject - Poetry.
folio - 46
Xerox - 92.

॥श्रीगणेशायनमः॥ यांचिंतयामिसततंमयिसाविरक्तासाचान्यमिच्छतिजनंस
जनोन्यसक्तः॥ अस्मत्कृतेचपरितुष्यतिकाचिदन्याधिक्तांचतंचमदनंचइमांच
मांच॥१॥ अज्ञः सुखमाराध्यः सुखतरमाराध्यतेविशेषज्ञः॥ ज्ञानलवदुर्विद
ग्धं ब्रह्मापितंनरंनरंजयति॥२॥ प्रसह्यमणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात्स
मुद्रमपिसंतरेत्प्रचलदूर्मिमालाकुलं॥ भुजंगमपिकोपितंशिरसिपुष्पव
द्धारयेन्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥३॥ लभेतसिकतासुतैलम
पियत्नतः पीडयन्पिबेच्चमृगतृष्णिकासुसलिलंपिपासार्दितः॥ कदाचिदपि
पर्यटन्शशविषाणमासादयेन्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥४॥

शशीदिवसधूसरोगलितयौवनाकामिनीसरोविगतपंकजंमुखमनक्षरंस्वाकृतेः

॥प्रभुर्धनपरायणः सततदुर्गतः सज्जनोनृपांगनगतः खलोमनसिसप्तशल्या

निमे॥५॥मणिःशाणोल्लीढः समरविजयीहेतिनिहतोमदक्षीणोनागः शर

दिसरितः श्यामपुलिनाः॥ कलाशेषश्चंद्रः सुरतमृदिताबालवनितास्त

न्निम्नाशोभंतेगलितविभवाश्चार्थिषुजनाः॥६॥परिक्षीणः कश्चित्स्पृह

यतियवानांप्रसृतयेसपश्चात्संपूर्णोगणयतिधरित्रींतृणसमां॥अतश्चा

नैकांताद्गुरुलघुतयार्थेषुधनिनामवस्थावस्तूनिप्रथयतिचसंकोच

यतिच॥७॥शास्त्रोपस्कृतशब्दसुंदरगिरः शिष्यप्रदेयागमाविख्या

गा२

भथे
२

ताः कवयो वसंति विषये यस्य प्रभोर्निर्द्धनाः॥ तज्जाड्यं वसुधाधिपस्य सुधियो ह्य
र्थं विनापीश्वराः कुत्स्याः स्युः कुपरीक्षकैर्न मणयो यैरर्घतः पातिताः॥ ९॥
विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः॥ यशसि
चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनां॥ १०॥ निंदंतु नीती
निपुणा यदि वा स्तुवंतु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टं॥ अद्यैव वा मर
णमस्तु युगांतरे वा न्याय्यात्पथः प्रविचलंति पदं न धीराः॥ ११॥ हर्त्तुर्याति न
गोचरं किमपि शं पुष्णाति यत्सर्वदा ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्रा
प्नोति वृद्धिं परां॥ कल्पांतेष्वपि न प्रयाति निधनं विद्याख्यमंतर्द्धनं येषां तां

४५

राम:
२

लघु २

न प्रतिमानमुपगतन्यायाः कलेः समं स्पर्द्धते ॥११॥ अधिगतपरमार्थान पंडिता
न्मावमंस्थास्त्रणामिव लक्ष्मी नैव तान्संरुणाद्धि। अभिनवमदलेखाश्या
मगंडस्थलानां न भवति शवशात तुर्घारसां वारणानां ॥१२॥ क्षुत्क्षामो
पि जराकृशोपि विगतप्रायोपि कष्टां दशामापन्नोपि विपन्नदीधितिरपि प्रा
णेषु नश्यत्स्वपि। मत्तेभेन्द्रविभिन्नकुंभकवलयंग्रासैकबद्धस्पृहः किं जी
र्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥१३॥ प्रिया न्याय्या वृत्तिर्मलिन
मसुभंगेप्यऽसुकरमसंतो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः विप
द्युच्चैः स्थेयं पदमनुविधेयं च महतां सतां केनोद्दिष्टं विषममसिधाराव्र

5

भार्ये
३

नमिदं ॥१४॥ मनसि वचसि कायेपुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणि
भिः प्रीणयंतः ॥ परगुणपरमाणून्पर्वतीकृत्यनित्यंनिजहृदि विकसंतः सं
ति संतः कियंतः ॥१५॥ इतः स्वपिति केशवः कुलमितस्तदीयद्विषामितश्चश
रणार्थिनः शिखरिणः पतत्रिणः शेरते ॥ इतोऽपिवडवानलस्सहसमस्तसंवर्त
कैरहो विततमूर्जितंभरसहंचसिंधोर्वपुः ॥१६॥ क्वचिद्भूमौशय्याक्वचिदपि
पर्यंकशयनं क्वचिच्छाकाहारः क्वचिदपिचशाल्योदनरुचिः ॥ क्वचित्कं
थाधारी क्वचिदपिचदिव्यांबरधरो मनस्वीकार्यार्थीनगणयतिदुःखं
नचसुखं ॥१७॥ येसंतोषसुखप्रमोषांनन्स्माहता ॥ इत्यकस्यकृतेकृतःस
दमुदितास्तेषां न भिन्ना मुदो येत्वन्ये धन लु

राम:
३

विधिनाताहृत्कूपंसेपहंस्वात्मन्येवसमाप्तहेममहिमामेरुर्नमेरोचते॥१८
नमःस्यामोदेवान्ननुहतविधेस्तेपिवशगाविधिर्वंद्यःसोपिप्रतिनियतक
र्मैकफलदःफलंकर्मायत्तंयदिकिममरैःकिंचविधिनानमस्तत्कर्मभ्यो
विधिरपिनयेभ्यःप्रभवति॥१९॥दौर्मन्त्र्यान्नृपतिर्विनश्यतियतिःसं
गात्सुतोलालनाद्विप्रोऽनध्ययनात्कुलंकुतनयाच्छीलंखलोपास
नात्॥ह्रीर्मद्यादनवेक्षणादपिकृषिःस्नेहःप्रवासाश्रयान्मैत्रीचा
प्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनं॥२०॥जाड्यंह्रीमतिगण्यतेव्रत
रुचौदंभःशुचौकैतवंशूरेनिर्घृणताऋजौविमतितादैन्यंप्रियालापिनि॥

भर्थ
४

तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे तत्को नाम गुणो भवेत्सु गुणिनां यो दुर्जनैर्नांकितः ॥२१॥ जातिर्यातु रसातलं गुणगणास्तस्याप्यधो गच्छतां शीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना । शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोस्तु नः केवलं येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥२२॥ भग्नाशस्य करंडपिंडिततनोर्म्लानेंद्रियस्य क्षुधा कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ॥ तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये कारणं ॥२३॥ पातितोपि कराघातैरुत्पतत्येव कंदुकः ॥ प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः

राम
४

8

॥२४॥ प्रायः कंदुकपातेनोत्पतत्यार्यः पतन्नपि । तथा त्वनार्यः पतति मृत्पिंडपत-
नं यथा ॥२५॥ प्रीणाति यः सुचरितैः पितरं स पुत्रो यद्भर्तुरेव हितमिच्छति
तत्कलत्रं । तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्य-
कृतो लभंते ॥२६॥ संपत्सु महतां चित्तं भवत्युत्पलकोमलं । आपत्सु च
महाशैलशिलासंघातकर्कशं ॥२७॥ दुर्जनः परिहर्त्तव्यो विद्ययालंकृतो-
पि सन् । मणिना भूषितः सर्पः किमसौ न भयंकरः ॥२८॥ मानमुद्वहतां पुं-
सांवरमापद्यदे पदे । मानहीनं सुरैः सार्द्धं विमानमपि संत्यजेत ॥२९॥ ही-
रेणात्मगतो दकाय हिगुणाः स्तनाः पुराते । खिलाः हीरोत्रापमवेत्स्यतेन

न

भर्तृ
५

पयसाह्यात्माकृशानौहुतः गंतुंपावकमुन्मनस्तदभवत्दृष्ट्वातुमित्रापदंयु
क्तंतेनजलेनशाम्यतिसतांमैत्रीपुनस्त्वीदृशः ॥२०॥ पात्मानृक्षखलान्क
रोतिविदुषोमूर्खान्हितान्द्वेषिणः प्रत्यक्षंकुरुतेपरोक्षममृतंहालाहलं
तत्क्षणात् ॥ तामाराधयपंचचंडिकांभगवतींभोक्तुंफलंवांछितंमोहाद्धी
व्यसनगुरोशुविपुलेष्वास्थांवृथामाकृथा ॥२१॥ कृमिकुलचितंला
लाक्लिन्नंविगंधिजुगुप्सितंनिरुपमरसंप्रीत्याखादन्नरास्थिनिरामि
षं ॥ सुरपतिमपिश्वापार्श्वस्थंविलोक्यनशंकतेनहिगणयतिक्षु
द्रोजंतुःपरिग्रहफल्गुतां ॥२२॥ स्वल्पस्नायुवसावशेषमलिनंनिर्मांसम

राम
५

10

प्यऽस्थिकं स्वालघ्वा परितोषमेति न च तन्नस्य क्षुधाशांतये ॥ सिंहो जंबुकमेक
मागतमपि त्यक्त्वा निहंति द्विपं सर्वः कृछ्रगतोपि वांछति जनः सत्वानु
रूपं फलं ॥ २३ ॥ पापान्निवारयति योजयते हिताय गुह्यं च गूहति गुणा
न्प्रकटीकरोति ॥ आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्र
वदंति संतः ॥ २४ ॥ मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनां ॥
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ २५ ॥ संतप्तायसि संस्थि
तस्य पयसो नामापि न ज्ञायते मुक्ताकारतया तदेव नलिनीपत्रस्थितं राज
ते ॥ स्वात्यां सागरशुक्तिमध्यपतितं सन्मुक्ताफलं जायते ॥ प्रायेणाधममध्यम

भर्तृ
६

धमगुणानां संसर्गतो जायते॥३६॥ ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे॥ रुद्रो येन कपालपाणिपु
टके भिक्षाटनं कारितः सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे॥
३७॥ मालतीकुसुमस्येव द्वे गती इह महात्मनः॥ मूर्द्ध्नि वा सर्वलोकस्य शी
र्य्यते वन एव वा॥३८॥ मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे भवति च तथा दूरतश्चाप्रगल्भः॥ क्षान्त्या भीरुर्यदि न सहते
प्रायशो नाभिजातः॥ सेवाधर्म्मः परमगहनो योगिनामप्यगम्यः॥३९॥
नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः स्वार्थान्संपा

राम
६

ष्यंतो विततपृथुतरारंभयत्नाः परार्थैः स्तोत्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मु
खान्दूषयंतः सन्तः साश्चर्यचर्य्या जगति बहुमताः कस्य नाभ्यर्चनीयाः
५०॥ लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः सत्यं चेत्तपसा च
किं शुचिमनो यद्यस्ति तीर्थेन किं सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मं
डनैः सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना॥५१॥ अम्भोजिनी
वनविलासनमेव हतं हंसस्य हंति नितरां कुपितो विधाता॥ नत्वस्य दुग्ध
जलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्त्तिमपहर्त्तुमसौ समर्थः॥५२॥ खल्वाटो
दिवसेश्वरस्य किरणैः संतापितो मस्तके वांछन्देशमनातपं विधिवशा

भूषणंसुजनताशौर्यस्यवाक्संयमोज्ञानस्योपशमःश्रुत

भये
६०

ह्विल्वस्यमूलंगतः॥ तत्राप्यस्यमहाफलेनपतताभग्नंसशब्दंशिरःप्रायो
गच्छतियत्रभाग्यरहितस्तत्रैवयांत्यापदः॥४३॥ नैवाकृतिःफलतिनैवकुलं
नशीलंविद्यानचापिनचयत्नकृतापिसेवा॥भाग्यानिपूर्वतपसाकिलसंचि
तानिकालेफलंतिपुरुषस्ययथैववृक्षाः॥४४॥ ऐश्वर्यस्यविनयोवित्तस्य
पात्रेव्ययः॥ अक्रोधस्तपसःक्षमाप्रभवितुर्धर्मस्यनिर्व्याजतासर्वेषाम
पिसर्वकारणमिदंशीलंपरंभूषणं॥४५॥ एतेसत्पुरुषाःपरार्थघटकाः
स्वार्थंपरित्यज्ययेसामान्यास्तुपरार्थमुद्यमभृतःस्वार्थाविरोधेनतु॥तेऽ
मीमानुषराक्षसाःपरहितंस्वार्थायनिघ्नंतियेनिरर्थकंपरहितंतेकेनजानी

ये तु घ्नंति

स्याव
४

राम
७

मेहा[illegible]नीं जं धियो हरति सिंचति वाचि सत्यं मानोन्नतिं दिशति पापमपाकरो
ति॥ चेतः प्रसादयति दिक्षु तनोति कीर्त्तिं सत्संगतिः कथय किं किं न करोति
पुंसां॥ ८१ वांछा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता विद्यायां व्यस
नं स्वयोषिति रतिर्लोकापवादाद्भयं॥ भक्तिः शूलिनि शक्तिरात्मदम
ने संसर्गमुक्तिः खले येष्वेते निवसंति निर्मलगुणास्तेभ्यो नरेभ्यो नमः
८२॥ दुर्ग्राह्यं हृदयं तथैव वदनं यद्दर्पणांतर्गतं भावः पर्वतसूक्ष्ममा
र्गविषमः स्त्रीणां न विज्ञायते॥ चित्तं पुष्करपत्रतोयतरलं विद्वद्भिराशंसि
तं नारी नाम विषांकुरैरिव लता दोषैः समं वर्द्धिता॥ ८५॥ त्स्नांछिधिमंद

15

मर्थ
८

स्मांज्ञाहिमदंपापेरतिंमाकृथाःसंपत्त्रस्वनुयाहिसाधुपदवींलिवस्वद्विष्णं
मान्यान्मानयविद्विषोप्यनुनयप्रच्छदयस्वानगुणान्कीर्त्तिंपालयदुःखि
तेकुरुदयामेतत्सतांचेष्टितं॥५०॥गुणावद्गुणोवद्वाकुर्वताकार्यमादौप
रिणातिरवधार्य्ययत्नतःपंडितेन॥अतिरभसकृतानांकर्मणांविपत्तेर्भ
वतिहृदयदाहीशल्यतुल्योविपाकः॥५१॥स्थाल्यांवैडूर्य्यमय्यांपचति
तिलखलिंचंदनैरिंधनाद्यैःसोवर्णैर्लांगलाग्रैर्विलिखतिवसुधामर्कमू
लस्यहेतोः छित्वाकर्पूरखंडान्वृत्तिमिवकुरुतेकोद्रवाणांसमंतात्प्राप्ये
मांकर्म्मभूमिंनचरतियनुजोयस्तपोमंदभाग्यः॥ यथावनेरतोशत्रुज

मा
राम:
८

वि

लाग्निमध्ये महार्णवे पर्वतमस्तके वा सुप्तं प्रमत्तं विषमस्थितं वा रक्षंति पुण्या
नि पुराकृतानि ॥५३॥ भीमं वनं भवति तस्य पुरं प्रधानं सर्वे जनाः सुजनतामु
पयांति तस्य। कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा यस्यास्ति पूर्वसुकृतं विपु
लं नरस्य ॥५४॥ मज्जत्वंभसि यातु मेरुशिखरं शत्रून् जयत्वाहवे वाणिज्यं
कृषिसेवनादि सकला विद्याः कलाः शिक्षतु। आकाशं विपुलं प्रयातु ख
गवत्कृत्वा प्रयत्नं परं नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कु
तः ॥५५॥ वरं प्राणाच्छेदः समदमघवन्मुक्तकुलिशप्रहारैरुद्गच्छद्बहल
दहनोद्गारगुरुभिः। तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे न चासौ सं

17

भर्थ

९

यांतः पयसि संपत्युरुचितं भापदि ॥ नेता यत्र बृहस्पतिः प्रहरणं वज्रं सुराः सै
निकाः स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वारणः ॥ इत्यैश्वर्य्यबलान्वि
तोपि मघवा भग्नः परैः संगरे तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृ
था पौरुषं ॥ ५७ ॥ कर्म्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ॥ तथापि सुधि
या भाव्यं सुविचार्य्यैव कुर्वता ॥ ५८ ॥ आलस्यं हि मनुष्याणां शरीरस्थो महा
न् रिपुः ॥ नास्त्युद्यमसमो बंधुः कृत्वा यं नावसीदति ॥ ५९ ॥ वरं पर्वतदुर्गे
षु भ्रांतं वनचरैः सह ॥ न मूर्खजनसंपर्कः सुरेंद्रभवनेष्वपि ॥ ६० ॥ दानं
भोगो नाशस्तिस्रो गतयो भवंति वित्तस्य ॥ यो न ददाति न भुंक्ते तस्य तृतीया ग

रामः

९

18

मेवति॥ ६१॥ यस्यास्ति वित्तं स नरः कुलीनः स पंडितः स श्रुतवान्गुणज्ञः॥ स ए
व वक्ता स च दर्शनीयः सर्वे गुणाः कांचनमाश्रयंति॥ ६२॥ रत्नैर्महार्हैस्तु
तुषुर्न देवा न भेजिरे भीमविषेण भीतिं॥ सुधां विना न प्रययुर्विरामं न नि
श्चितार्थाद्विरमंति धीराः॥ ६ ॥ असत्यपि बृहस्पतिप्रभृतयः संभाविताः प
चषा स्थान प्रोप्य च विशेषवित्त्रामरुचिरादुर्नैव राजते॥ हावेचयस्तते दि
नेश्वर निशापाराशस्य रो भास्करो भ्रातः पद्मिनीपरपदा तव पतिः शी
र्णविशेषीकृतः॥ ६ ॥ दानेन पाणिर्न तु कंकणेन श्रोत्रं श्रुतेनैव न तु कुं
डलेन॥ विभाति कायः करुणापराणां परोपकारेण न तु चंदनेन॥ ६४॥

मथ
१

जयंति ते सुकृतिनो रससिद्धाः कवीश्वराः नास्ति येषां यशः काये जरामरण
जन्मभिः॥ ६६॥ यस्य त्राति नभालय द्वालिरिव नेत्रोकं महद्धा धनं तथा
मोतिमकृस्य लेपि निनरामे सेतृतो नाधिकं। तद्दी रामवविन्न वस्तुषु
परां व त्रिवणामा कृथाः कृपेपरपप याति भावपि बृहोग्र ह्यातितुलं
जले॥ ६७॥ लांगूलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदर
दर्शनं च श्वा पिंडदस्य कुरुते गजपुंगवस्तु धीरं विलोकयति चाटुशतैश्च रामः
भुंक्ते॥ ६८॥ राजन्नदृष्टसंसिर्यदि ह सिद्धि बनुमेनाते नाघवत्सामि व

लोकमिमं पुषाण। तस्मिंश्च सम्यगनिशं परिपोष्यमाणो नानाफलैः फलति कल्प
लतेव भूमिः ॥६९॥ सत्यानृता च परुषा प्रियवादिनी चार्थपरा वदान्या ॥ नि
त्यव्यया प्रचुरनित्यधनागमा च वाराङ्गनेव नृपनीतिरनेकरूपा ॥७०॥
न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजां ॥ होतारमपि जुह्वानं स्पृष्टो
दहति पावकः ॥७१॥ विरम विरसायास्माद्दुर्व्यवसायतो विपदि म
हतां धैर्यध्वंसं कर्तुं च समीहसे ॥ अयि जड विधे कल्पापायेऽप्यपेतनिज
क्रमाः कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥७२॥ अकरुणत्वम
कारणविग्रहः परधनोपहृतिः परयोषितः स्वजनबन्धुजनेष्वसहिष्णुता प्र

भर्थ
११

कृतमिह महिम्ने हि दुरात्मनां ॥ ३ ॥ कांताकटाक्षविशिखा न दहंति यस्य चित्तं न
निर्दहति कोपकृशानुतापः ॥ कर्षंति भूरिविषयाश्च न लोभपाशा लोकत्रयं
जयति कृत्स्नमिदं स धीरः ॥ ४ ॥ आरंभगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृ
द्धिमती च पश्चात् ॥ दिनस्य पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जना
नां ॥ ५ ॥ प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः प्रियं कृत्वा मौनं सदसि
कथनं चाप्युपकृतेः ॥ अनुत्सेको लक्ष्म्यां चिरविभवसाराः परकथाः सतां के
नोद्दिष्टं विषममसिधाराव्रतमिदं ॥ ६ ॥ छिन्नोपि रोहति तरुः क्षीणोप्युपची
यते चंद्रः ॥ इति विमृशंतः संतः संतप्यते न विधुरेषु ॥ ७ ॥ भवंति नम्रास्त

राम
११

22

रवः फलोद्गमैर्नवांबुभिर्भूरिविलंबिनो घनाः॥ अनुद्धताः सत्पुरुषाः समृद्धि
भिः स्वभाव एवैष परोपकारिणां॥ कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते
धैर्यगुणः प्रमार्ष्टुं॥ अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदा
चिदेव॥ ७९॥ अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः॥ पर
परिवादनिवृत्तैः क्वचित्क्वचिन्मंडिता वसुधा॥ ८०॥ पद्माकरं दिनकरो वि
कचं करोति चंद्रो विकाशयति कैरवचक्रवालं नाभ्यर्थितो जलधरोपि जलं
ददाति संतः स्वयं परहितेषु कृताभियोगाः॥ ८१॥ एकेनापि हि शूरेण प
दाक्रांतं महीतलं क्रियते॥ भास्करेणेव स्फुरत्स्फारितेजसा॥ ८ श्भावं र

मथे
१२

श्रृंगो त्तुंगाद्गुरुशिखरिणः क्कापि विषमे पतित्वायं कायः कठिनदृषदंते विद
लितः ॥ वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने वरं वह्नौ पातस्तदपि
न कृतः शीलविलयः ॥ ८३ ॥ वह्निस्तस्य जलायते जलनिधिः कुल्यायते
यते विषं रसः पीयूषवर्षायते यस्यांगे ऽखिललोकवल्लभतमं शीलं समु
न्मीलति ॥ ८४ ॥ परचेतनोऽपि पुरुषः स्फुटः प्रज्वलति तावदुरिहेन कांतः
तेनेन स्त्रीपुरुषप्रकृति विकृतिकृष्ये सहतुः ॥ ८५ ॥ आज्ञा कीर्तिः पालनं ब्रा
ह्मणानां दानं भोगो मित्रसंरक्षणं च ॥ येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्ते
षां पार्थिवोपाश्रयेण ॥ ८६ ॥ परिचरितव्याः संतो यद्यपि कथयंति न सदु

राम
१२

दृशां॥ यास्त्वेषां स्थिरकथास्ताः एवमर्थयंति शास्त्राणि॥ ८७॥ व्यालंवालमृणालतं
तुभिरसौ रोद्धुं समुज्जृंभते भेत्तुं वज्रमणीन् शिरीषकुसुमप्रांतेन संनह्यति
॥ माधुर्यं मधुबिंदुना रचयितुं क्षाराम्बुधेरीहते नेतुं वांछति यः सतां पथि
खलान्सूक्तैः सुधास्यंदिभिः॥ ८८॥ स्वायत्तमेकांतगुणं विधात्रा वि
निर्मितं छादनमज्ञतायाः। विशेषतः सर्वविदां समाजे विभूषणं मौन
मपंडितानां॥ ८९॥ उद्भासिताखिलखलस्य विशृंखलस्य प्राग्जातविस्मृ
तनिजाधमकर्मवृत्तेः। दैवादवाप्तविभवस्य गुणद्विषोस्य नीचस्य गोच
रगतैः सुखमास्यते कैः॥ ९०॥ विद्यानाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं

25

भर्तृ
१२

नंविद्याभोगकरीयशःसुखकरीविद्यागुरूणांगुरुः॥विद्यांबंधुजनोविदेशगम
नेविद्यापरंदैवतंविद्याराजसुपूजितानहीधनंविद्याविहीनःपशुः॥२१
दाक्षिण्यंस्वजनेदयापरिजनेशाठ्यंसदादुर्जनेप्रीतिःसाधुजनेस्मयःख
लजनेविद्वज्जनेचार्जवंशौर्यंशत्रुजनेक्षमागुरुजने[illegible]जनेधूर्तता
येचैवंपुरुषाःकलासुकुशलास्तेष्वेवलोकस्थितिः॥[illegible]करेश्लाघ्यस्त्या
गःशिरसिगुरुपादप्रणमनंमुखेसत्यावाणीविजयि[illegible]भुजयोर्वीर्यमतु
लंहृदिस्वच्छावृत्तिःश्रुतमधिगतंचश्रवणयोः॥विनाप्यैश्वर्येणप्रकृति
महतांमंडनमिदं॥२३॥वहतिभुवनश्रेणींशेषःफणाफलकस्थितांकमठ

राम:
१२

पतिनामध्येष्टाहीसहासचवाण्येतेनमपिकुरुतेक्रोडाधीनंपयोनिधि
रादः हहमहतांनिःसीमानश्चरित्रविभूतयः॥९४॥म्लहयतिभुजंपे
रतएमायतकरवालकररुहविहीनां॥विजयश्रीवीरा[illegible]॥सुत्पन्नेपो
रुषनितेव॥९५॥सजातोयेनजातेनयातिवंश[illegible]समुन्नतिं॥प
रिवर्त्तिनिसंसारेमृतःकोवानजायते॥९६॥लज्जागु[illegible]वलनतोज
ननीमिवस्वामत्यंतशुद्धहृदयामनुवर्तमानांतेजस्विनःसुखमसूनपिसं
त्यजंतिसत्यव्रतव्यसनिनोनपुनःप्रतिज्ञां॥९७॥सिंहःशिशुरपिनिपत
तिमदमलिनकपोलभित्तिषुगजेषु॥प्रकृतिरियंसत्ववतांनखलुवय

भर्ष
१५

लिजसोहेतुः॥८॥किं कूर्म्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष य
त्किं वा नास्ति परिश्रमो दिनपते रास्ते न यन्निश्चलः किं त्वंगीकृतमुत्सृ
जन्नसहसा श्लाघ्यो जनो लज्जते निर्वाहः प्रतिपन्नवस्तुनि सतामेतद्धि
गोत्रव्रतं॥९॥ दूरादर्थं घटयति नवं दूरतश्चापशब्दं [illegible] स्य यो भवति
निरतः॥ सत्सभारंजनेषु मंदं मंदं रचयति पदं लोकचि[illegible]नुवृत्त्या काम
मंत्री कविरिव सदा खेदभारैरयुक्तः॥१०॥ देवेन प्रभुणा स्वयं जग
ति यद्यस्य प्रमाणीकृतं तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणं
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं सूक्ष्मा एव पतंति चातकमु

राम:
१५

खचित्राः पयोबिंदवः ॥१०१॥ अभिमुखनिहतस्य सततमिष्टं तु तावद्गयोप्यवा
स्वर्गः ॥१०३ अपघल्लासाधुवादश्रवणसुखस्यैवनाल्पतः ॥१०२॥ केयूराणवि
भूषयंति पुरुषं हारा न चंद्रोज्वला न स्नानं न विलेपनं न कुसुमं नालंकृ
ताम्धईजाः ॥ वाणेका समलंकरोति पुरुषं या संस्कृता धार्यते क्षीयंते ख
लु भूषणानि सततं वाग्भूषणं भूषणं ॥१०३॥ इति श्री भर्तृहरिकृतौ नी
तिशतकं समाप्तं ॥१॥ चूडोत्तंसितचारुचंद्रकलिकाचंचच्छिखाभास्वरो ली
लादग्धविलोलकामशलभः श्रेयोदशाग्रेस्फुरन् ॥ अंतःस्फूर्जदपारमो

भर्थ
१५

हृततिमिरप्राग्भारमुच्छैः स्फुरितः सप्रति योगिनां विजयते ज्ञानप्रदीपो हरः ॥१॥ भ्रूसम्भ्र
मसविभ्रमाप्रवितत यः खेलातपत्रोज्ज्वलल्लीलाहर्म्यमिरित्यनुभूपतेस्थिरमिव स्फीतिस्तु मेक
र्मश्रिया ॥ विच्छिन्नेनितरामनंगकलहक्रीडात्रुटत्कंचुकमुक्ताजालमिव प्रपातिलुठिति
भ्रमस्पृहि शोहृश्यतां ॥२॥ नावेद्द्वकृति नामपि स्फुरत्येष मंगल[illegible]दीपकः ॥ याव
द्वनकुरंगचक्षुषां तामन्ते च पललोचनां चलेः ॥३॥ चेत्पारु[illegible]वेच पलायतलो
चनानांतारापर्यवपीनपयोधराणां ॥ सामोदरे परिलस[illegible]लीलतानां
दृष्टाकृतिं विकृतिमेति मनो न येषां ॥४॥ सद्य योगाभ्याससम्यसनवशयो रात्ममनेसा रायः
र विच्छित्तौ मे स्फुरति कृतिनः स्पकिस्तुतैः ॥ प्रिया रागामालापैरधरमधुभिर्व १५

क्रविधुभिः सनिश्वासामोदैः सकुचकलशाश्लेषसुरतैः ॥ पायचक्षिमवतिं
गत्यागमसुहृदिश्यवार्त्ताश्रुतिमुखरमुखरमुखानां केवलं पंडितानां ॥ अघनम
रुरारल्लग्रेप्यिकांचीकलापं कुवलयनयनानां को विहातुं समर्थः ॥ धमनभ
कुंभदलने भुवि संति शूराः केचित्प्रचंडमृगराजवधेपि दक्षाः ॥ किंतु ब्रवीमि व
लिनां पुरस्तात् प्रसह्य कंदर्प्पदर्प्पदलने विरला मनुष्याः ॥ शान्तमनेन भावेन च
लन्नापापराज्ञु रैवरेंद्रकण्ठात् वशितेः चचौभिरीर्ष्याकलहे न लीलया समस्त
भावैः खलु बंधनं स्त्रियः ॥ [illegible]रस्ताम्बुलहल्लपत्तरहति मेखलोत्थ[illegible]कारन
पुरखाकुतराजहंस्याः ॥ कुर्वंति कस्य न मनो विवशं तरुण्याः पोषित्र[illegible]मुग्धदे

31

भर्त
१६

शिरीषसदृशोद्गारां ते माध्यासमंपजनावच्छिन्नपक्षपाताल्लोकेषु सर्वेषु च तथ्यमेतत्
नान्यन्मनो हारि हरिणानितं विनीष्पेदुः खेवके हेतु त्रैचक श्रीरम ॥१०॥ लीलावती
नो सहजा विलासा स्तए वमूढ स्य हृदिस्फुरन्ति ॥ रागो नलिन्या हि निसर्गसिद्ध
स्तत्र भ्रमत्येव मुधा षडंघ्रिः ॥११॥ सिद्धाध्यासितकंदरे हर[illegible]धावगाढद्रुमे
गंगाधौतशिलातले हिमवतः स्थाने स्थिते श्रेयसि । कः कुर्वीत शिरः प्रणाम
मलिनं म्लानं मनस्वी जनो यत्त्रस्तकुरंगशावनयना न स्युः स्मरास्त्रं स्त्रि
यः ॥१२॥ शिवनटहरिणाभ्यां वंशकांडच्छवीनां कवलमुपलकोटिच्छिन्नमूलं तृणानां तम:
कृशानां ॥ शुकयुवतिकपोलापांडुताम्बूलवल्लीदलामलरसानां नखाग्रैः पा

१८

32

ष्ठितं बाबधूम्यः ॥१३॥ असाराः सन्त्वेते विरतिविरसायासविषया जुगुप्सन्तां यद्वा न
नु सकलदोषास्पदमिति ॥ तथाप्येतद्भूमौ नहि परहितात्पुण्यमधिकं न चास्मिन्
संसारे कुवलयदृशो रम्यमपरं ॥१४॥ तथाप्यत्रस्तत्वप्रणिहितवि[illegible]म प्याजिवल्लभ
दीयां नास्त्येव यः स्फुरति हृदये कोपि महिमा ॥ भवक्कोवे राव[illegible]णिहितविपाम
मगुरवो विदग्धालापानां वयमपि कवीनामनुचराः ॥१५॥ [illegible]सुत्सार्प्य वि
चार्य्य कार्य्यमार्य्याः समर्थ्यादमिरेवं दन्तु ॥ स्निग्धानितंबाः किमु भूधराणामु
त स्मरस्मेरविलासिनीनां ॥१६॥ किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापैः द्वयमि
ह पुरुषाणां सर्व्वदा सेवनीयं ॥ अभिनवमदलीलालालसं सुंदरीणां स्तनभ

भर्य
१२

रपरिरिवन्नेयौवनंवावनंवा॥१४॥वालेलीलामुकुलितममीसुन्दरादृष्टिपाता:
किंक्षिप्यंतेविरमविरमव्यर्थएषश्रमस्ते॥संप्रत्यन्येवयमुपरतंबाल्यमास्था
वनान्ते॥क्षीणोमोहस्तृणमिवजगज्जालमालोकयामः॥१५॥पाइपेवालामांप्र
त्यनवरतमिंदीवरदलप्रभाचौरंचक्षुःक्षिपतिकि[illegible]तेमनया॥ग
तोमोहोऽस्माकंस्मरशवरबाणव्यतिकरज्वरज्वाला[illegible]नात्ता[illegible]न
वराकीविरमाति॥१६॥राजंस्तृष्णांबुराशेर्नहिजगतिगतः कश्चिदेवावसा
नंकोवार्थोर्थैःप्रभूतैःस्ववपुषिगलितेयौवनेसानुरागे॥गच्छामःसद्म
पावद्विकसितनयनेंदीवरालोनीनामाक्रम्याक्रम्यरूपंझटितिनजरसा

रामः
१२

लुप्यते प्रेयसीनां ॥२०॥ उपरि घनं घनपटलं तिर्य्यग्गिरयोऽपि नर्त्तितमयूराः वसु
धा कंदलधवला दृष्टिं पथिकः क्व पातयतु ॥२१॥ संसारेऽस्मिन्नसारे परिणति
तरले द्वे गती पंडितानां तत्वज्ञानामृतांभःप्लवलुलितधियां यातु कालः
कदाचित् । नो चेन्मुग्धांगनानां स्तनजघनाभोगसंभोगिनीनां स्थूलो
पस्थस्थलीषु स्थगितकरतलस्पर्शलोलोद्यतानां ॥२२॥ कांतेत्युत्पल
लोचनेति विपुलश्रोणीभरेत्युन्नतः पीनोत्तुंगपयोधरेति सुमुखांभो
जेति सुभ्रूरिति । दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि प्रत्यक्षा
शुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितं ॥२३॥ आकविस्तम्भभोगैः क्वचिद

भार्या

१८

पिचलल्लज्जापरिगतैः क्वचिद्गीतित्रस्तैः क्वचिदपि बल्लीलीविलसितैः ॥ कुमारिणा
मेभिर्वदनकमलैर्नेत्रचलितैः स्फुरन्नीलाब्जानां प्रकर मिव कीर्णं इव दशः ॥
॥२६॥ वक्त्रं चंद्रविलासं पंकजपरीहाससमे लोचने वर्णः स्वर्णमपाकरि
ष्णुरलिनीजिष्णुः कचानां चयः ॥ वक्षोजौ विभकुंभविभ्रमहरौ गुर्वी नितं
बस्थली वाचां मार्दवमुज्वलं युवतिषु स्वाभाविकं मंडनं ... स्थानामन्यानि
षं किं चिरं कां मुक्तानि तंबिनीं ॥ सेवामनल्लतास्तु चिरत्न विषवल्लरी २
रुचा तु पर्यंकं चिन्ताग्नाकण्ठाग्नाः स्निग्धा वाचालिंगितास्त्वे वहासा ॥ लील
मेदे प्रास्थिते च स्थिते च स्त्रीणामेतद्रूपराणां चापुंधेच ॥२७॥ स्मितं किं चिरं त्रे

रामा

१८

सरलतरलोदृष्टिविभवः परिस्पंदो वाचामभिभवविलासोक्तिसरसः॥ गती
नामारंभः किसलमितलीलापरिकरः स्पृशन्त्यास्तारुण्यं किमिह नहि र
म्यम् गदृशः॥१८॥ आवर्त्तः संशयानामविनयभवनं पत्तनं साहसानां दो
षाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानां॥ स्वर्गद्वारस्य विघ्नं न
कपुरमुखं सर्वमायाकरंडं स्त्रीयंत्रं केन सृष्टं विषममृतमयं प्राणिलो
कस्य पाशः॥१९॥ नो सत्येन मृगांक एष वदनीभूतो न चेंदीवरद्वंद्वं लोचन
तां गतं न कनकैरप्यंगयष्टिः कृता किंत्वेवं कविभिः प्रतारितमनास्तत्त्वं विजा
नन्नपि त्वङ्मांसास्थिमयं वपुर्मृगदृशां मंदो जनः सेवते॥२०॥ सन्मार्गे ताव

37

भ॰प॰
१९

दास्ते प्रभवति पुरुषस्तावदेवेंद्रियाणां लज्जां तावद्विधत्ते विनयमपि समालं-
बते तावदेव भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते यावल्ली-
लावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतंति ॥ १ ॥ यदेतत्पूर्णेंदुद्युतिहर-
रमुदाराकृतिधरं मुखाब्जं तन्वंग्याः किल वसति तत्राधरमधु । इदं तत्किंपा-
कद्रुमफलमिवातीव विरसं व्यतीतेस्मिन्काले विषमिव भविष्यत्यसुखदं ॥ २ ॥
संसारेस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलंकव्यासंगव्यस्तधैर्यं
कथममलधियो मानसं संविदध्युः । यद्येताः प्रोद्यदिंदुद्युतिनिचयभृतो न
स्युरंभोजनेत्राः प्रेंखत्कांचीकलापाः स्तनभरविनमन्मध्यभाजस्त-

रामः
१९

38

कारपः॥२३॥ परिमलमत्तो वातः शाखानवांकुरकोठपामधुपविरुतोत्कंठ
ःचार्चं प्रियाः पिकपहिराः॥ विरलसुरतखेदे हारावधूवदेवं दृवं प्रसर
तिमधोरात्र्यां जातो न कस्य गुरोरादपत्॥२४॥ अघाछचंदने सांद्रकरामृग
स्यो धाराम्लहारि कुसुमानि च कौमुदी चासेहेमरतुमनसः सुचितहस्यप
हंगृहीष्ममरंचमदनं च विवर्द्धयंति॥२५॥ शास्त्रज्ञोपि प्रथितविनयोप्यात्म
बोधापि वाढं संसारेस्मिन्भवति विरलो भाजनं सद्गतीनां। येनैतस्मिन्निरय
नगरद्वारमुद्घाठयंती वामाक्षीणां विमतिकुटिला भ्रूलता कुंचितेव॥२६॥
उन्मीलो त्रिवली तरंगवलया प्रोत्तुंगपीनस्तनद्वंद्वेनोद्यतचक्रवाकमि

भप धुना चक्रो बुजोद्गामिनी कांताकारभ्रमानदीपमभितः क्रूराशयानेष्यते संस
२· सारीव मज्जनं यदि हितं तो दूरे ता संसज्यतां ॥ ३ ॥ श्रा इह हि मधुरगीतं नृत्यमेतद्रसो
यं स्फुरति परिमलो सौ स्पर्श एष स्तनानां ॥ इति हतपरमार्थैरिंद्रियैर्भ्रा
म्यमाणाः स्वहितकरणदूरैः पंचभिर्वंचितो सि ॥ ३ पा ॥ संसारतत्वं निस्सा
रपरवीनरवीयसी ॥ अंतरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ ३ पा ॥ कामिनी
कायकांतारे कुचपर्वत दुर्गमे ॥ नो संचर मनः पांथ तत्रास्ते स्मरतस्करः
४ ॥ श्रृंगारद्रुमनीरदे प्रसृमरक्रीडारसस्रोतसि प्रद्युम्नप्रियबांधवे चतु
रवाङ्मुक्ताफलोदन्वति ॥ तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मी

राम:
२·

निःशेषश्चन्यः कोपि न विक्रयाकलपतिं प्राप्तेन वै यौवने ॥ ५ ॥ तारागस्याकारमे
कं नरकं सततमहादुःखसंप्राप्तिहेतुमीहस्यात्मनीवीजतलचरपालेशान
ताराधिपस्य ॥ कंदर्पस्येव कामित्रप्रकारैर्नविविधस्य प्रपञ्चेषु प्रपञ्चलोकोऽपि
त्रिघ्नन्त्यै निजकुलदहने यौवनारम्भदर्शिना ॥ यद् दृष्ट्वा मेषु [illegible]मुत्तमस्मार
शां प्रेमप्रसन्नं मुखं घ्रातव्येष्वपि किं च नस्यपवनैः श्रोत्रमेषु किं तद्वचः ।
किं स्वादेषु तदोष्ठपल्लवरसः स्पर्शेषु किं तत्तनुः ध्येये पर्कि न वपौ वने सह
दयैः सर्वत्र तद्विभ्रमः ॥ ८ ॥ आत्मवायच दुर्मुख्याय च ताराधीरा पिलाभि
च च ग्रामीराय च दुःकुलाय च गलत्कुष्टाभिभूताय च यच्छन्ती सुमनो

भर्थ
२१

रतिजवपुल्ले ह्मीलवश्रहयायरापस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रूपे
तकः ॥५५॥ कस्तु वृति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि चारभटचो
रचेठकनटविठनिष्ठीवनशरावं ॥५५॥ वेश्यासौ मदनज्वाला रूपेंधनस
मेधिता ॥ कामिभिः पत्र हूयंते यौवनानि धनानि च ॥५७॥ तत्कामफलं लो
के यद्द्योरेकचित्तता अन्यचित्तकृते कामे शवस्य रिव संगमः ॥५८॥ मधु
रयं मधुरैरपि कोकिलाकलकलैर्मलयस्य च वायुभिः विरहिणः प्रहि
ति शरीरिणां विपदि हंत सुधापि विषायते ॥५९॥ तावन्महीत्वं पांडित्यं
कुलीनत्वं विवेकिता ॥ यावज्ज्वलति नांगेषु हतः पंचेषु पावकः ॥६०॥ श्री

शृं
२१

मुखयंमुहरयोहरिरोहरणानीयेनाक्षिपंतसततंगृहकर्म्महासा॥वाचामगोच
रचरित्रपवित्रितायतस्मैनमोभगवतेकुसुमायुधाय॥५०॥स्त्रीमुद्रांरूषके
तनस्यविजेतांसर्व्वार्थसंपत्करींयेमूढाः प्रविहाययांतिकुधियोमिथ्या
फलान्वेषिणः॥तेतेनैवनिहत्यनिर्दयतरंनग्नीकृतामुंडिताः॥केचि
त्पंचशिखीकृताश्चजटिलाःकापालिकाश्चापरे॥५१॥विस्तारितम
करकेतनधीवरेणस्त्रीसंज्ञितंवडिशमत्रभवांबुराशौ।येनाचिरात्तद
धरामिषलोलमर्त्यमत्स्यान्विकृष्यसपचत्यनुरागवह्नौ॥५२॥जन्म
न्प्रेमसंरंभाद्दारभक्तेपदंगनाः॥तत्रप्रत्यूहमाधातुंब्रह्मापिखलुकातरः

भर्थ
२२

॥पयःप्रणयमधुराः प्रेमोद्गाढरसादलसास्तथाभणितिमधुरामुग्धप्राया
ः प्रकाशितसंमदाः॥ प्रकृतिसुभगाविस्रंभार्हाः स्मरोदयदायिनोरहसिकि
मपिस्वैरालापाहरंतिमृगीदृशां॥५३॥ मालतीशिरसिजृंभणान्मुखेचं
द्रनंवपुषिकुंकुमाविलं वक्षसिप्रियतमामनोहरास्वर्गएषपरिशिष्ट
आगतः॥५४॥ कुंकुमपंककलंकितदेहागौरपयोधरकंपितहारा॥
नूपुरहंसरणत्पदपद्माकंनवशीकुरुतेभुविरामा॥५५॥ नहितेकवि
वराविपरीतबोधायेनित्यमाहुरबलाइतिकामिनीनां॥ याभिर्विलो
लतरतारकदृष्टिपातैः शक्रादयोपिविजितास्त्वबलाःकथंताः॥५६॥

राम:
२२

खचर भतारको ऽसो निंद्रति यो ली कयं दिनो युवती ॥ यस्मान्न पसोपि फलं स्वर्गः स्व
र्गस्य फलं न यासरसः ॥ ५९ ॥ विश्रम्य विश्रम्य वनद्रुमाणां छायासु तन्वी विचचार
काचित ॥ स्तनोत्तरीयेन करोद्धृतेन निवारयंती शशिनो मयूखान ॥ ६० ॥ अ
दर्शने दर्शनमात्र कामा दृष्ट्वा परिष्वंग रसैक लोलाः ॥ आलिंगितायां पुनर
यतात्क्षयामाशास्महे विग्रहयोरभेदं ॥ ६१ ॥ उपरि निपतितानां स्तनस्थलि
कानां मुकुलनयनानां ॥ जनितसुरतखेद स्विन्नगंडस्थलीनामधरमधु
वधूनां भाग्यवंतः पिबंति ॥ ६२ ॥ किं गतेन यदि सा न जीवति प्राणिति प्रि
यतमा तथापि किं इत्युदीक्ष्य नवमेघमालिकां न प्रयाति पथिकः स्वमाल

45

भार्य॰
२३

यं॥ दृशान्यामीलितनयनानां यः सुरतरसो न संविदं कुरुते॥ मिथुनैर्मिथो व
धारितमवितथमिदमेव कामिनि वहते॥ ६४॥ प्रागसमासेतिमनागमानि
तगुणां ज्ञातामिलाषे॥ ततः सवउंतेदनुरूपो घतमनुप्रस्पल धैर्यपुनः प्रे
माह्रस्व ही राणीयनिर्भररहस्यक्रीडाप्रगल्भतं तो निःशंकाराविकर्षणाधि
कसुरवरसंकुलस्त्रीरत्नं॥ ६५॥ जावदेवामृतमयी यावद्वशे च न गोचरा
द्वन्द्वः संगाद्रूपेनानुविधारप्पतिरिच्यते॥ ६६॥ न गम्यो मंत्राणां न च भ
भवतिर्भेषजस्य विषयो न चापि प्रध्वंसं व्रजति विविधैः शांतिकशतैः॥ भ्रमया
विशादंगे किमपि विदधद्रागमसमं स्मरापस्मारो यं भ्रमयति दृशं घूर्णयति च

रामः
२३

ञ्चिता॥ ६९॥ नूनमात्ता करस्तस्याः सुभ्रुर्वामकरध्वजः॥ पतत्स्वनेत्रसं
चारस्त्वचितेषुप्रवर्त्तते॥ ६८॥ सतिप्रदीपे सत्यग्नौ सत्स्वतारात्त्विनेत्रसंचार स
चितेषुप्रवर्त्तते॥ रामसीहृषु॥ विनाममगशाखाह्यतमोभूतमिदं जग
त्॥ ६९॥ सुखेन चंद्रकांतेनामहानीलैः शिरोरुहैः॥ पाणिभ्यां पद्मरा
गाभ्यां रेजेरत्नमयीवसा॥ ७०॥ गुरुणा स्तनभारेण मुखचंद्रेण भास्व
ता शनैश्चराभ्यां पादाभ्यां रेजेग्रहमयीवसा॥ ७१॥ अहितानास्यमुनेद
त्ता विषास्तेचापलः भुजंगकुटिलस्तस्याभ्रूविक्षेपः स्वलायते॥ ७२॥
मुग्धेके यं धनुष्मता स्वपूर्वात्वपिद्दश्यते॥ पयाविद्धासि चेतांसि गुरोरे

भा॰ पि॰
२४

वनसायके ॥ ७३ ॥ एकोऽरागिषु राजते प्रियतमा देहार्धहारी हरो नीरागे
षु पुनर्विमुक्तललनासंगो न यस्मात्परः । दुर्वारस्मरपन्नगाधिकवि
षव्यासक्तमुग्धो जनः शेषः कामविडंबितो हि विषयान् भोक्तुं न मो
क्तुं क्षमः ॥ ७४ ॥ इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मन्मथ
विकाराः । तदपि च न कृतं नितंबिनीनां स्तनपतनावधि जीवितं रतं वा
॥ ७५ ॥ व्यास्वेर्घणा वलेन वक्रगतिना तेनाहि मामोगिनालीलाद्युति
नाहि नावरमहे दष्टा न तच्चक्षुषा दृष्टेऽस्मिन् विचिकित्सका दिशि दिशि प्रा
येण धर्मार्थिनो मुग्धाक्षीति चराविति स्य नहि मे वैद्यो न चाप्यौषधं ॥

राम॰
२४

48

ष्टा विरहेपि संगमः खलु परस्परं न संगतं मनो न येषां हृदयमपि चे
द्विघटितं संगमोपि विरहं विशेषयति ॥ ७७ ॥ अपसर सखे दूरादस्मात्कटाक्ष
विशिखानलात्प्रकृतिविषमाद्योषित्सर्प्पाद्विलासफणाभृतः ॥ इ
तरफणिना दष्टाः शक्याश्चिकित्सितुमौषधैश्चतुरवनिताभोगि
ग्रस्तं त्यजंति हि मंत्रिणः ॥ ७८ ॥ तस्यास्तनौ यदि घनौ जघनं विहारि
वक्त्रं च चारु तव चित्त किमाकुलत्वं ॥ पुण्यं कुरुष्व यदि तेषु तवास्ति
वांछा पुण्यैर्विना न हि भवंति समीहितार्थाः ॥ ७९ ॥ पांथस्त्रीविरहान
लाहुतिकथामातन्वती मंजरी माकंदेषु पिकांगनाभिमधुना सोत्कंठमा

भाप
२५

लोकान्ते ॥ अप्येते नव पाठला परिमलप्राग्भारपाटच्चरा वांतक्रांतिवितान तानवकृतः श्रीखंडशैलानिलाः ॥ ८ ॥ इतो विद्युद्वल्ली विलसितमितः के न किंतरो स्फुरद्धुंधः प्रोद्यज्जलदनिनदस्फूर्जितमितः ॥ इतः केकिक्रीडा कलकलइतः पक्ष्मलदृशां कथं यास्यंत्येते विरहदिवसाः संभृतरसाः ॥ ९ ॥ उन्मेतारुरापश्री नवपरिमलाः प्रोढसुरतप्रतानप्रारंभाः स्मारविजयहानप्रतिभुवः ॥ विरंचेतश्चोरा अभिनवविकारैकगुरवो विलासव्यापाराः किमपि विजयन्ते मृगदृशां ॥ वसंतः किलार्कविरेवदपीना राम पाश्वैविलासालसः करोति कोकिलकामिनीकलरवं स्मरलनाम

राम
२५

उप॰॰गोष्ठीसत्कविभिः समंकश्चित्पियेः सेव्याः सितांशोः कलाः केषांचीत्सु
खयंति नेत्रहृदयं चैत्रे विचित्राः क्षपाः ॥८३॥ सुधाधाम्नि भ्रंधामस्फुरद्दम
ल्लरश्मिः शशाध्वरः प्रियावक्त्राभोजमलयजरजश्छातिसुरभि स्त्रजा
हृष्यामोहान्नरिदमखिलं रागिणि जनेकरोत्यतः क्षोभं बहुविषयसं
सर्गाविमुखे ॥८४॥ व्यपक्षची संचारे नमलिनभास्वरोछन्नजलदध्वनिश्र
येमन्ये पतनद्धर्षांनीरनिचये ॥ इदं सोष्ठमिन्याः ककमनीयविलसितं
सुरंचमत्कानिंच प्रपथपत्रिपप्रिखेरसुरशां ॥८५॥ आवासः क्षितांगा

मर्पे यंविलसितंमुदेचम्लानिंचप्रयातिपथिखेरसुदर्शा॥७॥पान्थावासःक्रिय
२६ तांगोगेपापहारिणिवारिणि॥स्तनमध्येतरुणापावामनोहारिणिहारि
णि॥८॥घकेशाःसंयमिनःश्रान्तेरपिपरंपारंगतेलोचने॥अन्तर्वक्रमपि
स्वभावमृदुचिभिःकीर्णाद्विजानांगणैः मुक्तानांसततधिवासरुचिरं
वक्षोजकुंभद्वयंइत्थंतन्विवपुःप्रशान्तमपितत्रागंकरोत्येवनः॥९॥
प्रियपुरतोयुवतीयुवतीनांतावत्परमातनोतुदृरिमानः भवतिनयावत् रमः
चंदनतरुसुरभिर्मधुनिर्मलःपवनः॥१०॥सहकारकुसुमकेसरनिकर २६

मरामोदमूर्छितदिगंते॥ मधुरमधुविधुभ्रममधुपमधोभवेत्कस्यनोत्कं
ठा॥८९॥ स्रस्तोहृष्यामोद्दामजनपवनस्यंद्वकिरणाः॥ परागः कासारा
मलयजरजः सीधुविशदंसुचिः सोधोत्संगः प्रतनुवसनं पंकजदृशा
निदाघेतीरोतत्सुखमुपलभंतेसुकृतिनः॥९०॥ वियदुपचितमेघं भूम
यः कंदलिन्योनवकुटजकदंबामोदिनोगंधवाहाः॥ शिखिकुलकल
केकारावरम्यावनांताः॥ सुखिनमसुखिनंवासर्वमुत्कंठयंति॥९१
तरसीवेषादीपितकामाविकसितजातीपुष्पसुगंधिः॥ उन्नतपीनप
योधरभाराप्रावृट्तनुतेकस्यनहर्षं॥९२ धारासारेरात्रौहर्म्यांतः प्रिय

मथे
२१

तमेव पांशुपदाशन्यस्ते तशीतोत्कंपनिमित्तमायतदृशो गाढं समालिंग्यते।। नोतैः
शीतलशीकराश्चमरुतैर्नावांतपनखेदच्छिदो धन्यानां वत दुर्दिनं सुदिन
तां याति प्रियासंगमे।।९।। शरद्‌ नीत्वा निशाः सरभससुरतायासखि
न्नश्लथांगाः प्रोद्भूतासक्तितृष्णामधुमदनिरतो हर्म्यपृष्ठे विविक्ते । स
भोगक्लांतकांताशिथिलभुजलतावर्जितं कर्करीतो ज्योत्स्नाभिन्ना
सुधारं न पिबति सलिलं शारदं मंदभाग्यः।।१०।। प्रोषितप्रौढप्रियं यदुद्
तिभ्रांतिविह्वलं कुंद्रमाघट्टिरेफे काले प्राप्ते यवा।। प्रवयपथिकस्मितो ह्य
ममस्मारहास्मि।। पक्षानां कंठे लग्नाः स्वराणामपि तु हिनोत्के पिव साम्प्रतम्।।

रामः
२१

54

ह्रीतेषामापामितीयंयमसद्दनसमापामिनीपातियत्नं॥९ प्राहेमंतेर
धिदुग्धसर्पिरशनामांजिष्टवासोभृतःकाश्मीरद्रवसांद्रदिग्धवपुषः
खिन्नाविचित्रैरतैः॥पीनोरस्थलकामिनीजनकृताश्लेषागृहाभ्यंतरेतां
बूलीदलपूगपरितमुखाधन्याःसुखंशेरते॥९ घाचुंबन्नोगंडभित्तीर
लकवतिसुखसीत्कृतान्याद्धानाः वक्षस्वाकंचुकेषुस्तनभरपुलकोद्धे
दृभ्रापारयन्नगुरुनाकंपयंतः प्रभुत्वघनतहास्त्रसयन्नोमुकातिव्य
क्तेकांताजनानांविरचरितकृतःशेशिरावांतिवाताः॥९ शोकेशानाकु
लयनस्थोमुकुलयनवासोवलाद्यान्निप न्नातन्वन्नुलकोद्गमंप्रकट

५५

१४

भर्त
१८

यत्नांगेषु कृपणैः॥ वारंवारमुदारसीत्कृतकृतो दंतछदान्पीडयन्प्रायः शै
शिर एष संप्रति मरुत्कांतासु कांतायते ९८ वैराग्ये संचरत्येको नीतौ भ्र
मति चापरः॥ शृंगारे रमते कश्चिद्भुवि भेदाः परस्परं ९९ यद्यस्य नास्ति रु
चिरं न तत्र तस्य स्पृहा मनोज्ञेपि रमणीयेपि सुधांशो नमनः कामः सरो
जिन्याः॥१००॥ इति भर्तृहरिकृतौ शृंगारशतकं समाप्तं॥ दिक्कालाद्य
नवच्छिन्नानंतचिन्मात्रमूर्तये॥ स्वानुभूत्येकमानाय नमः शांताय तेज
से॥१॥ बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः॥ अबोधोपहताश्चान्ये
जीर्णमंगे सुभाषितं॥२॥ संमोहयंति मदयंति विडंबयंति निर्भर्त्सयंति र

राम:
१८

मस्यंति विषादयंति ॥ एताः प्रविश्य सदयं हृदयं नराणां किं नाम वामनयना न
समाचरन्ति ॥ ३ ॥ न संसारोत्पन्नं चरितमनुपश्यामि कुशलं विपाकः पुण्या
नां जनयति भयं मे विमृशतः ॥ महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विष
या महांतो जायंते व्यसनमिव दातुं विषयिणां ॥ ४ ॥ भ्रांतं देशमनेकदुर्ग
विषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता नि
ष्फला ॥ भुक्तं मानविवर्जितं परगृहे साशंकया काकवत्तृष्णे जृंभसि पाप
कर्मनिरते नाद्यापि संतुष्यसि ॥ ५ ॥ उत्खातं निधिशंकया क्षितितलं ध्मा
ता गिरेर्धातवो निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः मंत्रा

57

भ.वै.
२९

राधनतत्परेण मनसा नीताः स्मसाने निशाः प्राप्तः काणवराटकोपि न मया
तृष्णेऽधुना मुंच मां ॥ ६ ॥ खलोल्लापाः सोढाः कथमपि तदाराधनपरैर्निगृ
ह्यांतर्बाष्पं हसितमपि शून्येन मनसा ॥ कृतश्चित्तस्तंभः प्रतिहतधियामंज
लिरपि त्वमाशे मोघाशे किमपरमतो नर्तयसि मां ॥ ७ ॥ आदित्यस्य गता
गतैरहरहः संक्षीयते जीवितं व्यापारैर्बहुकार्यभारगुरुभिः कालो न वि
ज्ञायते ॥ दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते पीत्वा मोहम
यीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ८ ॥ दीना दीनमुखैः सदैव शिशुकै
राकृष्टजीर्णांबरां क्रोशद्भिः क्षुधितैर्निरन्नविधुरां दृष्ट्वा न चेद्गेहिनीं ॥

राम:
२९

58

ञ्चाभंगभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं को देहीति वदेत्स्वदग्धज
ठरस्यार्थे मनस्वी पुमान्॥९॥ निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः॥ शनैर्यष्ट्युत्थानं घन
तिमिररुद्धे च नयने अहो धृष्टः कायस्तदपि मरणापायचकितः॥१०॥
हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं व्यालानां पशवस्तृणां
कुरभुजः सृष्टाः स्थलीशायिनः॥ संसारार्णवलंघनक्षमधियां वृत्तिः कृ
ता सा नराणां यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः॥११॥ न ध्यातं
पदमीश्वरस्य विधिवत्संसारविच्छित्तये स्वर्गद्वारकपाटपाटनपटुर्

१९

भ०वै० २०

र्मोपि नोपार्जितः ॥ नारीपीनपयोधरोरुयुगलं स्वप्नेपि नालिंगितं मातुः के
वलमेव यौवनवनछेदे कुठारा वयं ॥११॥ भोगा न भुक्ता वयमेव भुक्तास्तपो
न तप्तं वयमेव तप्ताः ॥ कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जी
र्णाः ॥१२॥ क्षांतं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः सोढो दुःसह
शीतवाततपनक्लेशा न तप्तं तपः ॥ ध्यातं वित्तमहर्निशं नियमितप्राणै
र्न शंभोः पदं तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वंचिताः ॥१४॥
वलिभिर्मुखमाक्रांतं पलितैरंकितं शिरः गात्राणि शिथिलायंते तृष्णै
का तरुणायते ॥ येनैवाम्बरखंडेन संवीतो निशि चंद्रमाः ॥ तेनैव

राम २०

१६

60

[illegible]रिवा भानुरहोहो गतम्मे तपो ॥१६॥ अवश्यं यातारश्चिरतरमुषित्वापि वि
षया वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ॥ व्रजंतः स्वातंत्र्यादतुल
परितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनंतं विदधति ॥१७॥ कृ
शः काणः खंजः श्रवणरहितः पुछविकलो व्रणी पूयक्लिन्नः कृमि
कुलशतैरावृततनुः क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः शुनी
मन्वेति श्वा हतमपि च हंत्येव मदनः ॥१८॥ भिक्षाशनं तदपि नीरसमे
कवारं शय्या च भूः परिजनो निजदेहमात्रं वस्त्रं च जीर्णशतखंडम
यी च कंथा हा हा तथापि विषया न परित्यजंति ॥१९॥ स्तनौ मांसग्रंथी

भर्थ
२१

कनककलशाविस्युपमितोमुखंश्लेष्मागारंतदपिचशशांकेनतुलितंनास्र
वन्मूत्रक्लिन्नंकरिवरकरस्पर्द्धिजघनंमुहुर्निंद्यंरूपंकविजनविशेषैर्गु
रुकृतं॥२०॥ अजानन्माहात्म्यंपततिशलभस्तीव्रदहनेसमीनोप्यज्ञाना
द्बडिशयुतमश्नातिपिशितं॥ विजानंतोप्येतेवयमिहविपज्जालजटिला
न्नमुंचामःकामानहहगहनोमोहमहिमा॥२१॥ विसंफलमश[illegible]यस्वा
दुपानायतोयंशयनमवनिपृष्ठेवाससीवल्कलेच[illegible]नलवमधुम[illegible]
भ्रांतसर्वेंद्रियाणामनुनयमनुमंतुंनोत्सहेदुर्जनानां॥[illegible]थाविपुलमति
भिःकैरप्यनंतागतानितंपुराविधृतमपरैर्दत्तंचान्यैर्विजित्य[illegible]णायप

रामः
२१

स्मिहिमुक्तानन्यमेधीराश्चतुर्दशभुंजते कतिपयपुरस्वाम्ये पुंसां क एष मद
ज्वरः॥२३॥ त्वंराजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः ख्यातस्त्वंविभ
वैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः॥ इत्थं मानधनातिदूरमुभयोरप्याव
योरंतरं यद्यस्मासु पराङ्मुखोसि वयमप्येकांततो निस्पृहाः॥२४॥ अभु
क्तायां यस्यां क्षणमपि न यातं नृपशतैर्भुवस्तस्यालाभे क इव बहुमानः
क्षितिभुजां। तदंशस्याप्यंशे तदवयवलेशेपि पतयो विषादे कर्तव्ये विद
धति जडाः प्रमुदितमुदं॥२५॥ मृत्पिंडो जलरेखया परिवृतः सर्वोप्ययं नन्वणुस्व
शीकृत्य तमेव संयुगशतैराज्ञां गणा भुंजते॥ नो दद्युर्ददतोप्यथवा किमपि

भा०
३२

नेत्रेद्वारिद्राम्शेषंधिग्धिक्कृतान्पुरुषाधमान्भजनकरत्ना निर्छिंतितेम्पोपिप्ये॥ २६
ननठानविठानगायनीनपरद्रोहविरुद्धहृदयः॥ न पसंसत्‌दिनामकेवयं
स्तनभारानमिजानयोषितः॥२७॥सञ्जातः कोप्पासीत्मदनोरिपुरामर्दि
चवलंकपालंयस्याःस्तिविनिहितमलंकारविधये॥ नभिःप्राणान्त्राराप्रव
णामीतिमिःकेःश्चिरघुनाऽनमद्भिःकस्पुंसामयमतुलदर्प्येज्वरभरः॥
२८॥ अशीमहिवयंभैक्षमाशावासोवसीमहिशयीमहिमहीपृष्ठे कुर्वी
महिकिमीश्वरैः॥ २९॥ अर्थानामीशिषेत्वंवयमपिचगिरामीश्महेयावा[illegible]
शूरस्त्ववादिदर्प्प्यज्वरशमनविधावक्षयंपाटवंनः॥सेवंतेत्वांधनाढ्याम

राम:
३२

65

तिमत्त हरतोयेमामपि श्रोतुकामामभ्यप्यास्यातेनेचेत्वपि ममस्तु तरामेषरा
अनुगतोस्मि ॥ ३९ ॥ यदा किंचिद्दोहं हृदि पश्च महाधः सम भवं तदा सर्वे तोस्मी
त्पभवदवलिप्तं मम मनः ॥ यदा किंचित्कं किंचिद्बुधजनसकाशादवग
तं तदा मूर्खोस्मीति ज्वर इव मदो मे व्यपगतः ॥ ३१ ॥ मानेनम्लायिनि खंडि
ते च वसुनि व्यर्थे प्राप्ते कालेति नीरो वंधुजने गते परिजने नष्टे शनैर्यौ
वने । युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः पूतग्रावगिरीन्द्रक
दरदरीकुंजेषु वासः क्वचित् ॥ अथ परेषां चेतांसि प्रतिदिवसमाराध्यव
हुधा प्रसादः किं नेतुं विशसि हृदयं क्लेशकलिलं प्रसन्नेत्वय्यंवः स्वयमुदि

भा॰ २२

नचिन्तामणिगणो विवेकः संकल्पः किमभिलषितं पुष्यति न ते ॥३३॥ अमी
षां प्राणानां तुलितबिसिनीपत्रपयसां कृते किं नास्माभिर्विगलितवि
वेकैर्व्यवसितं ॥ यदंध्यानामग्रे द्रविणमदनिःसंज्ञमनसां कृतं वीतव्रीडै
र्निजगुणकथापाख्यानकमपि ॥३४॥ नायन्ते समये परोरहंस्यमधुना नि
द्राति नाद्यो न हि स्थित्वाऽहस्य निपाल्यति प्रभुरिति द्वारेषु येषां वचः
॥ चेतस्तानपहाय याहि भवनं देवस्य विश्वेशितुर्निर्दौवारिकनिर्दु
रोक्तिपरुषं निःसीमशर्मप्रदं ॥३५॥ भ्रातः कष्टमहो महान्स नृपतेः
सामन्तचक्रं च तत्पार्श्वे यस्य च साविदग्धपरिषत्ताश्चन्द्रबिंबाननाः संवृ

राम॰ २२

66

सचराजपुत्रनिवहस्तेवंदिनस्ताः कथासंर्व्वयस्यवशादगात्स्मृतिपदंकाल
यतस्मैनमः॥२९॥ वयंयेभ्योजाताश्चिरपरिगताएवखलुतेसमंयैःसंव
द्धास्मृतिविषयतांतेपिगमिताः॥इदानीमेतेस्मःप्रतिदिवसमासन्नपतना
स्तुल्यावस्थांसिकतिलनदीतीरतरुभिः॥३०॥ यत्रानेकःक्वचिदपिगृहेत
त्रतिष्ठत्यथैकोयत्राप्येकस्तदनुबहवस्तत्रनैकोपिचान्ते॥इत्थंचेमौ
रजनिदिवसौदोलयन्द्वाविवाक्षौकालःकल्पासहबहुकलःक्री
डतिप्राणिशारैः॥३१॥ तपस्यंतःसंतःकिमधिनिवसामःसुरनदींगुणो
दारान्दारानुतपरिचरामःसविनयं॥पिबामःशास्त्रौघानुतविविध

भर्त्र
३४

काष्ठामत्तरसान्त्रविमः किंकुर्मः कतिपयनिमेषायुषि जने नारण्यान्यहौ
वा हारे वा बलवति रिपौ वा सुहृदि वा मणौ वा लोष्टे वा कुसुमशयने वा
दृषदि वा तृणे वा स्त्रैणे वा मम समदृशो यांतु दिवसाः क्वचित्पुण्यार
ण्ये शिव शिवेति प्रलपतः ॥ ८० ॥ गंगातीरे हिमगिरिशिलाबद्धपद्मास
नस्य ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ॥ किं तैर्भाव्यं मम सु
दिवसैर्यत्र ते निर्विशंकाः संप्राप्स्यंते जरठहरिणाः शृंगकंडूविनोदं ॥
८१ ॥ स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनाः शांत
ध्वनिषु रजनीषु द्युसरितः ॥ भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्तवचसः

राम:
३४

कदास्यामानंदोद्गतबहलबाष्पाकुलदृशः॥४२॥ शिरः शार्वं स्वर्गात्पशुप
तिशिरस्तः क्षितिधरं महीध्रादुत्तुंगादवनिमवनेश्चापि जलनिधिं॥ अधोधो
गांगेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति विनिपातः शत
मुखः॥४३॥ आशा नाम नदी मनोरथजला तृष्णातरंगाकुला रागग्राह
वती वितर्कविहगा धैर्यद्रुमध्वंसिनी॥ मोहावर्त्तसुदुस्तरातिगहना प्रो
त्तुंगचिंतातटी तस्याः पारगता विशुद्धमनसो नंदंति योगीश्वराः॥४४॥ आ
संसारं त्रिभुवनमिदं चिन्वतां तात तादृङ्नैवास्माकं नयनपदवीं श्रोत्रमा
र्गं गतो वा॥ योयं धत्ते विषयकरिणीगाढगूढाभिमानक्षीवस्यांतःकर

भा॰ वै॰
३५

राकरिणां संयमात्कानलीनां ॥ श्पापे वर्धते घनयति पुरः पार्थनाडः खभा
ज्ञो ये चाल्पत्वं दधाति विषपाशे य पर्यन्तवृद्धे ॥ तेषामंतः पुरि न हसितं वा
सरागांस्मरेयध्यान छेदे शिखरिकुहरग्रावशय्यानिषण्णाः ॥४८॥ विघ
ध्रिगान्ताकृत्लं करहिताविन्नेच नोपार्ज्जितेषु शुश्रूषापिसमाहितेन मनसा
पित्रैर्न्नेसंपादिताज्ञालोलायतलोचनापुवतयः ॥ स्वप्नेपि नालिंगितां
कालेपंपरपिंडलोलुपतया काकेरिव प्रेरिताः ॥४७॥ चिंतीरोस सर्वी
खतरुराकरुशापूर्णाहृदयाः स्मरंतः संसारं द्विगुणापरिणामावधिगा
न वयंपुरापारणे परिणानशारच्चंद्रकिरणात्रियामां नेष्यामोहरचर

रा॰ म॰
३५

70

णाछिन्नैकशरणाः॥४८॥वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या सम इह
परितोषो निर्विशेषो विशेषः॥स तु भवतु दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोर्थवान्को दरिद्रः॥४९॥यदेतत्स्वाछंदं विहरण
मकार्पण्यमशनं सहार्य्यैः संवासः श्रुतमुपशमैकव्रतफलं म
नो मंदस्पंदं बहिरपि चिरस्यापि विमृशन्न जाने कस्यैषा परिणतिरु
दारस्य तपसः॥५०॥पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्ष
य्यमन्नं विस्तीर्णं वस्त्रमाशादशकमचपलं तल्पमस्वल्पमुर्वी॥येषां
निःसंगतांगीकरणपरिणतिः स्वात्मसंतोषिणस्ते धन्याः संन्य

भथ
३६

न्यत्तैर्दैत्यघातिकरनिकराः कर्म्मनिर्मूलयंति ॥५८॥ हुराराध्याः स्वामी तुर
गचलचित्ताः क्षितिभुजो वयं तु स्थूलेच्छाः समहति पदे स्वमनसः ॥ ज
रा देहं मर्त्युर्हरति सकलं जीवितमिदं सखे नान्याच्छ्रेयो जगति विदुषा
न्यत्र तपसः ॥५९॥ भोगा मेघवितानमध्यविलसत्सौदामिनीचंच
ला न्मायुर्वायुविघट्टिताभ्रपटलछिन्नांबुवद्भंगुरं ॥ लोला यौवन
लालसा तनुभृतामित्याकलय्याद्रुतं योगे धैर्यसमाधिसिद्धिसु
लभे बुद्धिं विदध्वं बुधाः ॥५२॥ पुण्ये ग्रामे वने वा महति सितपटच्छन्नपाली
कपाली मादाय न्याय मर्गं द्विजहुतहुतभुग्धूमधूम्रोपकंठे द्वारं द्वारं प्रवृत्तो

राम:
३६

वे[illegible]मुद्दरदरीपुरराणीयत्नुधात्रीमानीप्राराणीसनाथान्पुनरनुदिनंतुल्यकु
लं हीनः ॥५५॥ चांडालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः किं वा
तत्वनिवेशपेशलमतिर्योगीश्वरः कोपि किं ॥ इत्युत्पन्नविकल्पजल्प
मुखरैः संभाव्यमानोजनैर्नो क्रुद्धाः पथि नैव तुष्टमनसो यांति स्वयं यो
गिनः ॥५६॥ रजस्माद्विरमेंद्रियार्थगहनादायासकादाश्रयश्रेयोमा
र्गमशेषदुःखशमनव्यापारदक्षं हराः ॥ स्वामीभावमुपेहि संत्य
जनिजांपाकछोलनोलांगतिं माभूयो भजभंगुरां भवरतिं चेतः प्रसीद

भ०
३१

धुना॥५६॥ पुष्पैर्मूलफलैः प्रियैः प्रणयिनीं वृत्तिं कुरुष्वाधुना भूशय्यां त्वरा
वल्कलैरकृपणोरुत्तिष्ठ यामो वनं॥ क्षुद्राणामविवेकमूढमनसां यत्रेश्वरा
णां महाविभ्रव्याधिविकारविह्वलगिरां नामापि न श्रूयते॥ ५७॥ मोहं मा
र्जय तामुपार्ज्जय रतिं चंद्रार्द्धचूडामणौ चेतः स्वर्गतरंगिणीतटभुवामास
गमंगीकुरु॥ को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च स्त्रीषु च ज्वालाग्रे
षु पन्नगेषु च सरिद्वेगेषु च प्रत्ययः॥५८॥ अग्रे गीतं सरसकवयः पा
र्श्वतो दाक्षिणात्याः पश्चाल्लीलावलयरणितं चामरग्राहिणीनां॥ यद्यस्त्ये
वं कुरु भवरसास्वादने लंपटत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समा

राम०
३०

धै[illegible]पला विरमत बुधा योषित्संगसुखात् क्षणभंगुरात् कुरुत करुणामैत्रीप्र
ज्ञावधूजनसंगमं॥ नखलु नरके भाराक्रांतं घनस्तनमंडलं शरणमथवा श्रो
णीबिंबं रणन्मणिमेखलं॥ ६०॥ प्राणाघातान्निवृत्तिः परधनहरणे संयमः
सत्यवाक्यं काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषां तृष्णा॥
स्रोतोविभंगो गुरुषु च विनतिः सर्वभूतानुकंपा सामान्यः सर्वशास्त्रेष्वनु
पहतमतिः श्रेयसामेष पंथाः॥ ६१॥ मातर्लक्ष्मि भजस्व कंचिदपरं मत्कांक्षि
णी मास्म भूः भोगेभ्यः स्पृहयालवस्तव वशे का निःस्पृहाणामसि॥ सद्यः
स्यूतपलाशपत्रपुटके पात्रे पवित्रीकृते भिक्षासक्तुभिरेव संप्रति वयं

भ० ४८

कन्निं समीहामहे ॥ हे पूयं वयं वयं पूयमित्यासीन्मतिरावयोः ॥ किंपातमधु
नायितमधय पूयं वयं वयं ॥ ६२ ॥ इत्थं हम्र्यंतलं न किं वसंतपेशं व्यन गोपारिके
॥ किं वाप्राशासमासमागमसुखं नैवाधिकंप्रीतये ॥ किंतु श्रांतपतत्यतग
पवनव्यालोलहीपांकुरच्छायाचेचलमाकल्पसकलसेनो वनांतेगता
॥ ६३ ॥ किं कंहाः कंदरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः प्रध्वस्ता
वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ॥ वीक्ष्यंते यन्मुखानि
प्रतिभमपगतप्रश्रयाशांखलानां दुःखोपात्तानल्पवित्तस्मायवशापव
[illegible]निर्विन भ्रूलताति ॥ ६४ ॥ गंगातरंगकणशीकरशीतलानि विघा

राम: ४०

घ॰ाध्युषितचारुशिलातलानि ।।स्थास्यंति किं हिमवतः प्रलयंगतानि यत्त
व॰ा नपरपिंडरता मनुष्याः ।।८५।। यदा मेरुः श्रीमान्निपतति युगांताग्निनि
हतः समुद्राः शुष्यंति प्रचुरमकरग्राहनिलयाः ।। धरा गच्छत्यंतं धरणि
धरपादैरपि धृता शरीरे का वार्ता करिकलभकर्णाग्रचपले ।। ८६ ।।
एकाकी निस्पृहः शांतः पाणिपात्रो दिगंबरः कदा शंभो भविष्यामि क
र्मनिर्मूलनक्षमः ।।८७।। प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं
पदं शिरसि विद्विषतां ततः किं संमानिताः प्रणयिनो विभवैस्ततः किं क
ल्पं स्थितं तनुभृतां तनुभिस्ततः किं ।।८८।। भक्तिर्भवे मरणजन्मभयं हृदि

भ०
२९

स्यंस्नेहोनवंधुषुनमत्मथत्ना विकाराः संसर्गाह्येषारहितावि मनावनंतातोवे
रागामास्ति किमतः परमर्थनीयं ६९॥ तस्मादनंतमजरंपरमंविकाशिमद्व
स्मंचिंतयकिमेभिरसद्विकल्पैः॥ यस्यानुषंगिणइमेभुवनाधिपत्यभोगा
दयः कृपणलोकमताभवंति ७० पातालमाविशसि यासि नभोविलंघ्य
दिङ्मंडलंभ्रमसि मानसचापलेन॥ भ्रांत्यापिजातुविमलंकथमात्मनी
नं तद्ब्रह्म नास्मरसि निर्वृतिमेषियेन ७१॥ रात्रिः सैव पुनः स एव दिव
सो मत्वाबुधा जंतवो धावंत्युद्यमिनस्तथैव निभृतं प्रारब्धतत्तत्क्रियाः
व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुनासंसारेणकदर्थिताः क

ए.भः
२९

78

ष्य ।हामोहीन्नलज्जामहो॥७शाम्भः पर्य्यंकीतिनभुजलतागेंडुकः खंविता
नं ।पश्चंद्रो विरतिवनितासंगलब्धप्रबोधः॥ दिक्कन्याभिः पवनचमरैर्वी
ज्यमानोऽ नकूले भिक्षुः शेते नृपइव भुवि त्यक्तसर्वस्पृहोपि॥७३॥ त्रैलो
क्याधिपतित्वमेव विरसं यस्मिन्महाशासने तल्लब्ध्वापरितोषमपिच मनो।
भोगेरतिं मा कृथाः भोगाः कोपि स एक एव परमो नित्योदितो जृंभते यत्स्वा
द्वाद्विरसा भवंति विभवास्त्रैलोक्यराज्यादयः॥७४॥ किं वेदैः स्मृतिभिः
पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनिवासफलदैः कर्म्म
क्रियाविभ्रमैः मुक्त्वैकं भवदुःखभाररचनाविध्वंसकालानलं स्वात्म

79

मर्ष
४०

नंदपद्मवेशकलनं शेषे वो गिरः क्रियतामिः ॥ १५ ॥ आपुकल्लोललोलं कतिपयदिवसस्थायिपीनोपोवनश्रीरर्थाः संकल्पकल्पाघनसमयतडिद्विभ्रमो भोगपूरः । कंठाश्लेषोपगूढं तदपि न च चिरं यत्प्रियाभिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयांभोधिपारं तरीतुं ॥ १६ ॥ ब्रह्मांडमंडलीमात्रं किं भोगाय मनस्विनः शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ १७ ॥ यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं तदा दृष्टं नारीमयमिदमशेषं जगदिति ॥ इदानीमस्माकं पटुतरविवेकांजनजुषां समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ १८ ॥ रम्याश्चंद्रमरीचयः कुसुमिता रम्या वनांतस्थली

राम:
४०

र॰ प्राणसमासमागमोद्भवसुखं कामेषु रम्याः कथाः ॥ कोपोपाहितबाष्पबिंदुतरलं
खं प्रियाया मुखं सर्वं रम्यमनित्यतामुपगते चित्ते न किंचित्पुनः ॥७९॥ भि
क्षाशी ॥ जनमध्यसंगरहितः स्वायत्तचेष्टः सदा हानादानविविक्तमार्गो
निरतः कश्चित्तपस्वी स्थितः ॥ रथ्याकीर्णविशीर्णचीरवसनैः संप्राप्तकं
थाधनो निर्मानो निरहंकृतिः शमसुखाभोगैकबद्धस्पृहः ॥८०॥ मातर्मे
दिनि तात मारुत सखे ज्योतिः सुबंधो जल भ्रातर्व्योम निबद्ध एष भवताम
ग्र्यप्रणामांजलिः युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मलज्ञाना
पास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥८१॥ यावत्स्वस्थमिदं श

81

भ.·श

रीरमरुजं यावज्जरा दूरतो यावच्चेंद्रियशक्तिरप्रतिहता यावत्क्षयो ना
युषः॥ आत्मश्रेयसि तावदेव विदुषा कार्य्यः प्रयत्नो महान् संदीप्ते
भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥८२॥ नाभ्यस्ता भुवि वादि
वृंददमनी विद्या विनीतोचिता खड्गाग्रैः करिकुंभपीठदलनैर्नाकं न
नीतं यशः॥ कान्ताकोमलपल्लवाधररसः पीतो न चंद्रोदये तारुण्यं
गतमेव निष्फलमहो शून्यालये दीपवत्॥८३॥ अहो वा हारे वा ब
लवति रिपौ वा सुहृदि वा मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा

रामः

८२

त्वरोवोत्क्रेगावाममम च सह शोपांनु दिवसान्क्षा चिन्तुरापदरोपशिवशिवशिवे
ति प्रलपतः ॥ ८४॥ ह्यानंसत्तामानमहादिनाशनं केषांचिदेतन्मदमान
कारणं ॥ स्थाने विमुक्तं यमिनां विमुक्तये कामातुराणां मतिकामकार
णं ॥ ८५॥ जीर्णा एव मनोरथाः स्वहृदये यातं च तद्यौवनं हंतांगेषु गुणा
श्च वंध्यफलतां याता गुणज्ञैर्विना ॥ किं युक्तं सहसाभ्युपैति बलवान्का
लो हि सर्वान्तकृत्तन्मत्वा तन्मधुसूदनांघ्रियुगलं मुक्त्वास्ति नान्यागतिः
॥ ८६॥ सत्यामेव त्रिलोकीसरिति हरशिरश्चुंविवीचिच्छटायां सद्वृत्तिं क

83

भ०
४२

ल्पफलपांतठविठपिमं वेवेल्कलैः सफलैश्च कौ विहा नवित्तचित्त ज्वरजनि
तरुजीती त्रदुःखाहिंतानां वक्त्रं वीक्षितं दुस्थ्येयदिनविभ्रपाल्बिकुं वेतुकं
यां॥ ८७॥ तृषाशुं सन्न प्राशीपिवति सलिलं स्वादुसुरभि क्षुधार्तः सन्श
लिं कवलयति मांसादिकलितं प्रदीप्ते कामाग्नौ सुदृढतरमाश्लिष्यति
वधूं प्रतीकारो व्याधेः सुखमिव विपर्य्यस्यत्यबुधः॥ ८८॥ भोगास्तृप्ताः भ्र
गुतस्फुरज्जलरमिंद्र्वाकांशिवाबाह्ययेसंतः क्रीडतुमिंद्रियैः सुखलवप्रा
प्यमभ्युद्यतः॥ संसारेत्वराभंगभंगुरतरेत्लम्यं नचात्मेतिकस्यात्मन

राम:
४२

ऌसमाद्धिनिर्म्मितसुखं यन्नत्स्वयं चिंतयन्तां ॥ ८९ स्नात्वा गाँगैः पयोभिः शु
चिकुसुमफलैरर्च्चयित्वा विभो त्वां ध्येये ध्यानं निवेश्य क्षितिधरकुहरस्था
वपर्यंकमूले आत्मारामोपि लीलो गुरुवचनरतस्त्वत्प्रसादात्स्मरा
रे दुःखमोक्ष्ये कदाहं समचरणाकरे पुंसि सेवास्मुत्थ ॥ ९० ॥ प्रियस
वविपदेउ प्रांतप्रपातपरंपरापरिचपवने चित्ताचक्रे निधायविधिः
खलः ॥ मदमिवबलात्पिंडीकृत्यप्रगल्भकुल्पलवङ्ममयति मनानो
ज्ञानिमः किमत्र विधास्पति ॥ ९१ ॥ महेश्वरे वा जगतामधीश्वरे जन
ई ने वा जगदंतरात्मनि नयो न भेद प्रतिपत्तिरस्ति मे तथापि भक्तिस्तरु

८५

भ०प
४२

रोंद्रुशेखरे॥८२॥किंकंदर्प्पकरंकदर्थयसिरेकोदंडटंकारितैरेरेकोकि
लकोमलंकलरवंकिंत्वंवृथा॥चल्गसिमुग्धेस्निग्धविदग्धमुग्धम
धुरैर्लोलैःकटाक्षैरलंचेतश्चुंबितचंद्रचूडचरणध्यानामृतेवर्त्तते॥
८३कोपीनंशतखंडजर्जरतरंकंथापुनस्तादृशीनिश्चिंतंसुखसा
ध्यभैक्षमशनंशय्याश्मशानेवने मित्रामित्रसमानतातिविमलाचि
न्ताथशून्यालयेध्वस्ताशेषमदप्रमादमुदितोयोगीसुखंतिष्ठति॥
८४॥भोगाभंगुरवृत्तयोबहुविधास्तैरेवचायंभवस्तत्कस्येहकृतेप
रिभ्रमतरेलोकाःकृतंचेष्टितैः॥आशापाशशतोपशांतिविशदं

राम०
४२

86

यतः समाधीयतां कामोत्पत्तिवशं स्वधामनि परिश्रमे हेयमस्तहचः ९५
धन्यानां गिरिकंदरे निवसतां ज्योतिः परं ध्यायतामानंदाश्रुजलं पि
बंति शकुना निःशंकमंकेशयाः ॥ अस्माकं तु मनोरथोपरचित
प्रासादवापीतटक्रीडाकाननकेलिकौतुककुषामायुः परं क्षीयते
॥९६॥ आघ्रातं मरणेन जन्म जरया यात्युत्तुंगं यौवनं संतोषो धन
लिप्सया शमसुखं प्रौढांगनाविभ्रमैः ॥ लोकैर्मत्सरिभिर्गुणा उ
पवनो व्यालैर्नृपा दुर्जनैरस्थैर्येण विभूतिरप्युपहता ग्रस्तं न किं के
न वा ॥९७॥ आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते लक्ष्मी

भरथ
४४

पेत्रयंतीतित्रविविधवद्धा राश्वव्यापदः ॥ ज्ञातज्ञातमवृरूपमात्मु विवशंमनुं
करोत्या त्मसत्वं किंनाम निरंकुशेनाविधिनायनिर्मितसुस्थितो ॥८७॥ नून
छिराामेध्यमध्यातियमितततनुभिः स्थायते धार्मवासेकांतावि श्लेषदु
खव्यतिकं रविषमोपावने विप्रयोगः ॥ नारीराामथवहाविलसि
तं वसतिर्वद्धभावेष्य साधुः संसारेरे मनुष्यावदत्तयरिसु खंस्व
ल्पमप्यास्ति किंचित ॥८९॥ आपूर्वेघर्षशाने न गापरिमितरात्रौ नद
र्धगतं तस्याईस्यपरस्य चाईमपरं बालत्ववृहत्वयोः ॥ शेषंव्याधिवि
योगदुःखसहितं सेवादिभिर्नीयते जीवे वारितरंगवुद्वुदसमे सौख्यं

राम
४४

88

कृतः प्राणिनां॥१००॥ अभिमतमहामानग्रंथिप्रभेदपटीयसी गुरुतरगु
णग्रामांभोजस्फुटोज्वलचंद्रिका विपुलविलसल्लज्जावल्लीविदारिकु
ठारिका जठरपिठरी दुःपूरेयं करोति विडंबनं॥१०१॥ अलमलता न विवेकि
नोऽमलधियः कुर्वंत्यहो दुःकरं यन्मुंचंत्युपभोगभंज्यपि धनान्येकां
तेतो निस्पृहाः॥ नप्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढः प्रत्ययो वांछा
मात्रपरिग्रहाण्यपि परंत्यक्तुं न शक्ता वयं॥१०२॥ व्याघ्रीव तिष्ठति ज
रापरितर्जयंती रोगाश्च सत्रव इव प्रहरंति देहे॥ आयुः प्रस्रवति भि
न्नघटादिवांभो लोकस्तथाप्यहितमाचरतीति चित्रं॥१०३॥ क्वचिद्वी

भ०
४५

णावाद्यं क्वचिदपि च हाहेति रुदितं क्वचिद्विद्वद्गोष्ठी क्वचिदपि च सुरामत्तकलहः ॥ क्वचिद्रामा रम्याः क्वचिदपि च गलत्कुष्ठवपुषो न जाने संसारः किममृतमयः किं विषमयः ॥१०४ भोगास्तुंगतरंगभंगचपलाः प्राणाः क्षणध्वंसिनः स्तोकान्येव दिनानि यौवनसुखं प्रीतिः प्रियेष्वस्थिरा ॥ तत्त्वं सारमसारमेव मरिवलं बुध्वा बुधा बोधने लोकानुग्रहपेशलेन मनसा यत्नः समाधीयतां ॥१०५॥ सज्जाति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः तदपि तत्क्षणभंगि करोति चेद

१भ०
४५

हेहकष्टमपंडितताविधेः॥१॥ इतिभर्तृहरिकृतौवैराग्यशतंसंपू
र्णसमाप्तः॥ रामायनमः संवत१७८७ समयेभाद्रोवदिडुइजीके छ॥
पोथीलीख्यः शुभमस्तुः॥ ॥हि पो

हैपोथिकेसोजट ८ छ क॥

॥ पुस्तकमिदं कविते३ बेणुगोपाल-
संसूभद्यस्य नेसकस्यात्सा कमि॥
दं यम्

[OrderDescription]
,CREATED=05.10.20 15:46
,TRANSFERRED=2020/10/05 at 16:01:46
,PAGES=92
,TYPE=STD
,NAME=S0003875
,Book Name=M-1558-SHATAKTRYI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,